॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ५८

भृशमाव्रजमानस्य तस्याधोवामलोचनम् ।
प्रास्फुरच्चास्खलद्रामो वेपथुश्चास्य जायते ॥ १॥

उपालक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः ।
अपि क्षेमं तु सीताया इति वै व्याजहार ह ॥ २॥

त्वरमाणो जगामाथ सीतादर्शनलालसः ।
शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ ३॥

उद्भ्रमन्निव वेगेन विक्षिपन्रघुनन्दनः ।
तत्र तत्रोटजस्थानमभिवीक्ष्य समन्ततः ॥ ४॥

ददर्श पर्णशालां च रहितां सीतया तदा ।
श्रिया विरहितां ध्वस्तां हेमन्ते पद्मिनीम् इव ॥ ५॥

रुदन्तमिव वृक्षैश्च स्रानपुष्पमृगद्विजम् ।
श्रिया विहीनं विध्वस्तं सन्त्यक्तवनदैवतम् ॥ ६॥

विप्रकीर्णाजिनकुशं विप्रविद्धबृसीकटम् ।
दृष्ट्वा शून्योटजस्थानं विललाप पुनः पुनः ॥ ७॥

हृता मृता वा नष्टा वा भक्षिता वा भविष्यति ।
निलीनाप्यथ वा भीरुरथ वा वनमाश्रिता ॥ ८॥

गता विचेतुं पुष्पाणि फलान्यपि च वा पुनः ।
अथ वा पद्मिनीं याता जलार्थं वा नदीं गता ॥ ९॥

यत्नान्मृगयमाणस्तु नाससाद वने प्रियाम् ।
शोकरक्तेक्षणः शोकादुन्मत्त इव लक्ष्यते ॥ १०॥

वृक्षाद्वृक्षं प्रधावन्स गिरींश्चापि नदीन्नदीम् ।
बभूव विलपन्रामः शोकपङ्कार्णवप्लुतः ॥ ११॥

अस्ति कच्चित्त्वया दृष्टा सा कदम्बप्रिया प्रिया ।
कदम्ब यदि जानीषे शंस सीतां शुभाननाम् ॥ १२॥

स्निग्धपल्लवसङ्काशां पीतकौशेयवासिनीम् ।
शंसस्व यदि वा दृष्टा बिल्व बिल्वोपमस्तनी ॥ १३॥

अथ वार्जुन शंस त्वं प्रियां तामर्जुनप्रियाम् ।
जनकस्य सुता भीरुर्यदि जीवति वा न वा ॥ १४॥

ककुभः ककुभोरुं तां व्यक्तं जानाति मैथिलीम् ।
लतापल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः ॥ १५॥

भ्रमरैरुपगीतश्च यथा द्रुमवरो ह्ययम् ।
एष व्यक्तं विजानाति तिलकस्तिलकप्रियाम् ॥ १६॥

अशोकशोकापनुद शोकोपहृतचेतसं ।
त्वन्नामानं कुरु क्षिप्रं प्रियासन्दर्शनेन माम् ॥ १७॥

यदि ताल त्वया दृष्टा पक्वतालफलस्तनी ।
कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥ १८॥

यदि दृष्टा त्वया सीता जम्बुजाम्बूनदप्रभा ।
प्रियां यदि विजानीषे निःशङ्कं कथयस्व मे ॥ १९॥

अथ वा मृगशावाक्षीं मृग जानासि मैथिलीम् ।
मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत् ॥ २०॥

गज सा गजनासोरुर्यदि दृष्टा त्वया भवेत् ।
तां मन्ये विदितां तुभ्यमाख्याहि वरवारण ॥ २१॥

शार्दूल यदि सा दृष्टा प्रिया चन्द्रनिभानना ।
मैथिली मम विस्रब्धः कथयस्व न ते भयम् ॥ २२॥

किं धावसि प्रिये नूनं दृष्टासि कमलेक्षणे ।
वृक्षेणाच्छाद्य चात्मानं किं मां न प्रतिभाषसे ॥ २३॥

तिष्ठ तिष्ठ वरारोहे न तेऽस्ति करुणा मयि ।
नात्यर्थं हास्यशीलासि किमर्थं मामुपेक्षसे ॥ २४॥

पीतकौशेयकेनासि सूचिता वरवर्णिनि ।
धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम् ॥ २५॥

नैव सा नूनमथ वा हिंसिता चारुहासिनी ।

कृच्छ्रं प्राप्तं हि मां नूनं यथोपेक्षितुमर्हति ॥ २६ ॥

व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः ।
विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया ॥ २७ ॥

नूनं तच्छुभदन्तौष्ठं मुखं निष्प्रभतां गतम् ।
सा हि चम्पकवर्णाभा ग्रीवा ग्रैवेय शोभिता ॥ २८ ॥

कोमला विलपन्त्यास्तु कान्ताया भक्षिता शुभा ।
नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ ॥ २९ ॥

भक्षितौ वेपमानाग्रौ सहस्ताभरणाङ्गदौ ।
मया विरहिता बाला रक्षसां भक्षणाय वै ॥ ३० ॥

सार्थेनेव परित्यक्ता भक्षिता बहुबान्धवा ।
हा लक्ष्मण महाबाहो पश्यसि त्वं प्रियां क्व चित् ॥ ३१ ॥

हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः ।
इत्येवं विलपन्नामः परिधावन्वनाद्वनम् ॥ ३२ ॥

क्व चिदुद्भ्रमते वेगात्क्व चिद्विभ्रमते बलात् ।
क्व चिन्मत्त इवाभाति कान्तान्वेषणतत्परः ॥ ३३ ॥

स वनानि नदीः शैलान्गिरिप्रस्रवणानि च ।
काननानि च वेगेन भ्रमत्यपरिसंस्थितः ॥ ३४ ॥

तथा स गत्वा विपुलं महद्वनं
परीत्य सर्वं त्वथ मैथिलीं प्रति ।
अनिष्ठिताशः स चकार मार्गणे
पुनः प्रियायाः परमं परिश्रमम् ॥ ३५ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com